# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

## अध्याय ९२

तच्छ्रुत्वा हर्षमापेदे राघवो भ्रातृभिः सह ।
वाक्यं चाद्भुतसङ्काशं भ्रातॄन्प्रोवाच राघवः ॥ १॥

इमौ कुमारौ सौमित्रे तव धर्मविशारदौ ।
अङ्गदश्चन्द्रकेतुश्च राज्यार्हौ दृढधन्विनौ ॥ २॥

इमौ राज्येऽभिषेक्ष्यामि देशः साधु विधीयताम् ।
रमणीयो ह्यसम्बाधो रमेतां यत्र धन्विनौ ॥ ३॥

न राज्ञां यत्र पीदा स्यान्नाश्रमाणां विनाशनम् ।
स देशो दृश्यतां सौम्य नापराध्यामहे यथा ॥ ४॥

तथोक्तवति रामे तु भरतः प्रत्युवाच ह ।
अयं कारापथो देशः सुरमण्यो निरामयः ॥ ५॥

निवेश्यतां तत्र पुरमङ्गदस्य महात्मनः ।
चन्द्रकेतोश्च रुचिरं चन्द्रकान्तं निरामयम् ॥ ६॥

तद्वाक्यं भरतेनोक्तं प्रतिजग्राह राघवः ।
तं च कृता वशे देशमङ्गदस्य न्यवेशयत् ॥ ७॥

अङ्गदीया पुरी रम्या अङ्गदस्य निवेशिता ।
रमणीया सुगुप्ता च रामेणाक्लिष्टकर्मणा ॥ ८॥

चन्द्रकेतुस्तु मल्लस्य मल्लभूम्यां निवेशिता ।
चन्द्रकान्तेति विख्याता दिव्या स्वर्गपुरी यथा ॥ ९॥

ततो रामः परां प्रीतिं भरतो लक्ष्मणस्तथा ।
ययुर्युधि दुराधर्षा अभिषेकं च चक्रिरे ॥ १०॥

अभिषिच्य कुमारौ द्वौ प्रस्थाप्य सबलानुगौ ।
अङ्गदं पश्चिमा भूमिं चन्द्रकेतुमुदङ्मुखम् ॥ ११॥

अङ्गदं चापि सौमित्रिर्लक्ष्मणोऽनुजगाम ह ।
चन्द्रकेतोस्तु भरतः पार्ष्णिग्राहो बभूव ह ॥ १२॥

लक्ष्मणस्त्वङ्गदीयायां संवत्सरमथोषितः ।
पुत्रे स्थिते दुराधर्षे अयोध्यां पुनरागमत् ॥ १३॥

भरतोऽपि तथैवोष्य संवत्सरमथाधिकम् ।
अयोध्यां पुनरगम्य रामपादावुपागमत् ॥ १४॥

उभौ सौमित्रिभरतौ रामपादावनुव्रतौ ।
कालं गतमपि स्नेहान्न जज्ञातेऽतिधार्मिकौ ॥ १५॥

एवं वर्षसहस्राणि दशतेषां ययुस्तदा ।
धर्मे प्रयतमानानां पौरकार्येषु नित्यदा ॥ १६॥

विहृत्य लाकं परिपूर्णमानसाः
श्रिया वृता धर्मपथे परे स्थिताः ।
त्रयः समिद्धा इव दीप्ततेजसा
हुताग्नयः साधु महाध्वरे त्रयः ॥ १७॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com